# केन्द्रीय विद्यालय संगठनम्

## एर्णाकुलम संभाग:

### संकलनात्मकम् मूल्यांकनम् – 1

### सम्प्रेषणाधारितम् संस्कृतम् 2016 - 17

**X - Sanskrit** कक्षा - दशमी

अवधि: - होरात्रयम् पूर्णांका: - 90

अनुक्रमांक: (Roll No) 1045

नाम Aparna S Dev

खंड: क - अपठित अवबोधनम् - 10 अङ्का:

खंड: ख - रचनात्मकम् कार्यम् - 15 अङ्का:

खंड: ग - अनुप्रयुक्त व्याकरणम् - 30 अङ्का:

खंड: घ - पठित अवबोधनम् - 35 अङ्का:

निर्देशा:

1 अस्मिन् प्रश्नपत्रे चत्वार: खंडा: सन्ति।

2 उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि।

3 प्रत्येकस्य खंडस्य उत्तराणि एकत्र एव लेखनीयानि।

4 प्रश्नपत्रे उत्तराणि नैव लेखनीयानि।

5 उत्तराणि संस्कृते एव लेखनीयानि।

## खंड: क

## अपठित अवबोधनम् - 10 अङ्का:

**1. अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत -**

प्रकृत्या अस्मभ्यं स्वच्छं निर्मलं च पर्यावरणं दत्तम् । परन्तु भौतिक - पदार्थानां अन्धप्रतिस्पर्धायां अस्माभि: तत् प्रदूषितं कृतम । एतत् प्रदूषणं चतुर्विधं दृश्यते - वायुप्रदूषणं , जलप्रदूषणं , ध्वनिप्रदूषणं , मृत्प्रदूषणं च। बृहतां उद्योगानाम् वाहनानां च धूम्रै: धूम्रपानेन तथा च वृक्षाणां छेदनेन वायु: प्रदूषित:

भवति। जलप्रदूषणं तु महानगराणां दूषितजलस्य शुद्धजले मेलनेन , अवकरक्षेपणेन च भवति। वाहनानां ध्वनियन्त्रैः , ध्वनिविस्तारकयन्त्रैः च कोलाहलेन ध्वनिप्रदूषणं भवति । जल-वायु प्रदूषणेन एव मृदा प्रदूषिता भवति । एवं चातुर्विधं प्रदूषणं वारयितव्यम् । सर्वजनहिताय सर्वजनसुखाय च पर्यावरणस्य रक्षा करणीया।

1 एकपदेन उत्तरत 1x2=2

1 केषाम् छेदनं वायु प्रदूषणस्य कारणं भवति

2 अस्माभि : कस्य रक्षा कर्तव्या ?

2 पूर्णवाक्येन उत्तरत- 1X2=2

1 प्रकृत्या अस्मभ्यं कीदृशं पर्यवारणं दत्तम् ?

2 मृदा कथं प्रदूषिता भवति ?

3 निर्देशानुसारं विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत 1x4=4

1 "अस्मभिः तत् प्रदूपितं कृतम् " - अत्र तत् सर्वनामशब्दं कस्मै प्रयुक्तम् ?

अ) प्रकृत्यै आ) पर्यावरणाय इ) वायवे ई) जलाय

2 "उद्योगानाम" अस्य पदस्य किं विशेषणम् ?

अ) बृहतां आ) वृक्षाणां इ) वाहनानां ई) प्रदूषणानां

3 " कृतम् " अत्र कः प्रत्ययः ?

अ) तल् आ) क्त्वा इ) क्त ई) त्व

4 "प्रकृत्या" इत्यत्र का विभक्तिः ?

अ) चतुर्थी आ) पञ्चमी इ) द्वितीया ई) तृतीया

4 अस्य गद्यांशस्य एकं उचितं शीर्षकं लिखत - 2

## खंडः ख

## रचनात्मकम् कार्यम् (15 अङ्काः )

**2) भवतः नाम सुरेशः। विद्यालयद्वारा आयोजितायाः विनोदयात्रायाः वर्णनम कृत्वा पितरं प्रति लिखितं पत्रम् मंजूषासाहायेन पूरयत।** ½x10 = 5

{ प्राप्तवान् , सुरेशः, अध्यापिकाः, पर्वतप्रदेशम, तिरुवनंतपुरतः , पितृमहोदय ,प्राणमाः , श्रावयिष्यामि , द्रष्टुमपि , शैक्षिकयात्रा }

विवेकानंद छात्रावासः

1) ...........

पूजनीय 2) .................... ,

सादरं प्रणामाः। अत्र सर्वं कुशलम्। तत्राप्यस्तु। मम विद्यालये विगतमासे एका 3)......................... आयोजिता आसीत्। अहमपि गतवान्। इयम् यात्रा वागमन नाम पर्वतप्रदेशाम् प्रति आसीत्। 4).................................. प्रति मम इयम् प्रथमा यात्रा आसीत्। तत्र पर्वतोपरि हिमपातः प्रचलति स्म। मध्ये मध्ये एकः अन्यम् 5)......................... न शक्नोति स्म। अहं सुहृद्भिः सह मिलित्वा बहु आनंदं 6)....................। विद्यालयस्य वरिष्ठाः अध्यापकाः 7) ................. च अस्माभिः सह आगताः। विस्तृतं विवरणम् आगत्य 8) .................. । सर्वेभ्यः मम 9)..............।

...य: प्रियपुत्र:

/ ..........................

3) अधोदत्तम् चित्रम् दृष्ट्वा मञ्जूषासहायेन संस्कृते पञ्च वाक्यानि लिखत।   2x5=10

{ शुनका: , गृहाणि , बालक: , स्नानं , शिरसि , घटम् , उभयत:
चक्रेण , क्रीडति, जलं, भरति , अनेके, वृक्षा:, मार्गम् }



<u>खंड: - ग</u>

## <u>अनुप्रयुक्त व्याकरणम् (30 अङ्का:)</u>

4) अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिम् सन्धिच्छेदम् वा कुरुत।   1x5=5

क) <u>नास्ति</u> विद्यासमं चक्षु:।

अ) न + आस्ति   आ) ना + अस्ति   इ) न + अस्ति   ई) ना + आस्ति

ख) <u>यथोचितम्</u> क्रियताम्।

अ) यथा + ऊचितम्   आ) यथा +ओचितम्   इ) यथा +उचितम्   ई) यथो + चितम्

ग) अहं <u>वेदं पठामि</u>।

अ) वेदम् + पठामि   आ) वेदं + पठामि   इ) वेद + पठामि   ई) वेदमा + पठामि

घ) क: <u>शुचि: + इह</u> ?

अ) शुचिरह   आ) शुचिरिह   इ) शुचीरिह   ई) शुचि इह

ङ) <u>य: + अन्यथा</u> कुरुते मन:।

अ) य अन्यथा   आ) योरन्यथा   इ) येन्यथा   ई) योऽन्यथा

5.अधोलिखितवाक्येषु रेखाङ्कितेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। 1X6=6

1) स: <u>देशभक्त:</u> अस्ति ।

अ) देशस्य भक्त:   आ) देश भक्त: येन स:

इ) देशान् भक्त:   ई) देशात् भक्त:

2 येन मम लोकयात्रा <u>निर्बाधा</u> स्यात्

अ) निर्गता बाधा यस्मात्   आ) निराबाधा यस्य   इ) निराश्रिता बाधा येन   ई) निर्गत आबाधा यया

3. न <u>अनृतम्</u> ब्रूयात्।

अ) अनान तम्   आ) न ऋतम्   इ) अन अऋतम्   ई) ना नृतम्

4. तव लोचनं <u>नीलोत्पलम्</u> इव भवति ।

अ) नीला उत्पलम्  आ) नीलम् उत्पलम्  इ) नीलेन उत्पलेन  ई) नीलोल पलम्।

5. <u>चन्दनरसः</u> शीतलः भवति।

अ) चन्दने रसः आ) चन्दनेषु रसः  इ) चन्दनस्य रसः  ई) चन्दनाय रसः

6. <u>सप्तर्षयः</u> आगच्छन्ति।

अ) सप्त आर्षयः आ) सप्ताः आर्षयः  इ) सप्त ऋषयः ई) सप्ता ईर्षयः

**6) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत।** 1x5=5

क) अस्माभिः सर्वैः संस्कृतम् **<u>पठनीयम्</u>**

ख) रात्रौ सावधानमनसा **<u>चलितव्यम्</u>**।

ग) रामः **<u>गुण+ मतुप्</u>** राजा आसीत्।

घ) कुबेरः **<u>धन + इन</u>** राजा आसीत्।

ङ) **<u>धर्म + ठक्</u>** कार्यम् एव कुर्यात्।

**7) मंजूषातः उचितम् अव्ययपदम् चित्वा वाक्यानि पूरयत।** 1x5=5

{ अपि , उच्चैः , इतस्ततः , विना , शनैः }

क) पिपासितः काकः जलमन्विष्य ................ अभ्रमत्।

ख) कूर्मः ............ गच्छति।

ग) वने सिंहः ............... गर्जति।

घ) सीता ........... रामेण सह वनम् गच्छति।

ङ) परिश्रमम् ................ सफलता न प्राप्यते।

**8) अधोलिखितेषु वाच्यपरिवर्तनेषु रिक्तस्थानानि पूरयत।** 1x5=5

1) कर्तृवाच्यम् - <u>रमेशः</u> पुस्तकम् पठति।
कर्मवाच्यम् - .............. पुस्तकम् पठ्यते।

2) कर्तृवाच्यम् - अहम् <u>वृक्षम्</u> पश्यामि।
कर्मवाच्यम् – मया ................ दृश्यते।

3) कर्तृवाच्यम् - शिक्षकः त्वाम् <u>कथयति</u>।
कर्मवाच्यम् - शिक्षकेण त्वम् ....................।

4) कर्मवाच्यम् – <u>गायकेन</u> गीतम् गीयते।
कर्तृवाच्यम् - .................. गीतम् गायति।

5) कर्मवाच्यम् – मात्रा <u>पुत्री</u> रक्ष्यते।
कर्तृवाच्यम् - माता ............. रक्षति।

**9) अधोलिखितवाक्येषु अंकानाम् कृते संस्कृते समयम् लिखत।** 1x4=4

क) अहं प्रातः (6:00)......................... वादने उत्तिष्ठामि।

ख) प्रातः (7:30)......................... वादने प्रातराशम् करोमि।

ग) प्रातः (9:15)......................... वादने विद्यालयम् गच्छामि।

घ) सायम् (4:45)......................... वादने गृहम् प्रत्यागच्छामि।